Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 6 | ISSN : 2581- 6306

# दयानन्दग्रन्थे शिक्षणपद्धतिविमर्शः

डॉ. विनोद कुमार तिवारी
प्रधानाचार्यः, राजकीय–उच्चमाध्यमिकविद्यालयः, चतुर्भजपुरा, निवाई, टोंक, राजस्थान।

**Article Info**
Volume 4, Issue 6
Page Number : 208-213

**Publication Issue :**
November-December-2021

**Article History**
Received : 15 Nov 2021
Published : 30 Nov 2021

**शोध आलेख सार–** वेदशास्त्रादिशिक्षाम् अवाप्य गुरुदक्षिणारूपेण तस्मै लवङ्गादि प्रायच्छत्। गुरुश्च तं समादिशत् 'हे वत्स ! वर्धस्व! वेदविद्यया विद्योतय, शास्त्राणि समुल्लासय, भुवने वैदिकधर्मज्योति प्रज्वालय, सत्यशास्त्राणि समुद्धर, मतमतान्तरप्रसारिताम् अविद्यानिशीथिनीम् अफ्सारय, पाषण्डतर्ति समून्मलय' इति। यद्यप्यद्यत्वेऽपि न सर्वथेयं भारतीयाभूमिः शून्या, परन्तु साम्प्रतं विरला एव विद्वांसः सन्ति येषां पद्धतीनां विषये रुचिः निष्ठा श्रद्धा वा स्यात्। इदन्तु धवं यत् आर्षशिक्षणपद्धतेः आर्षसंस्कृत्याः च संरक्षणार्थं पुनराद्रेया इमाः पद्धतयः।

**मुख्य शब्द :** साहित्यम्, दयानन्दः, शिक्षणपद्धति, व्याख्यापद्धतिः, प्रश्नोत्तरपद्धतिः।

स्वामिनः मते शिक्षाया आरम्भः गर्भादानाद् आरभ्य भवति अतः मातापितरौ उत्तमसन्तानप्राप्त्यर्थं सदाचरणमुत्तमपदार्थानां सेवनं कुर्याताम्। स्वामिदयानन्दः मनुते यत् गर्भादानाद् आरभ्य माता सद्वर्तनेन स्वाध्यायेन गर्भस्थशिशुं परिपालयेत् संस्कुर्यात् बालजन्मनः परं पञ्चवर्षपर्यन्तं मातैव शिष्टाचारान् वर्णोच्चारणं मातभाषां शिक्षयेत् पश्चात् बालकं पिता सप्तमवर्ष यावत् विद्यां, लौकिकव्यवहारान् बोधयेत्। ततः परम् अष्टमे वयसि गुरुकुलं पाठशालां वा प्रेषयेत् यन्त्र उत्तमाचार्यस्य सविधे सदाचारान् नैतिकगुणान् नानाविद्याः[1] शिल्पकलाः बालकः सम्पादयेत्।

शिक्षणव्यवस्थायां शिक्षणपद्धतिस्तु प्राणभूतः भवति। शिक्षणपद्धतिरेव शिक्षणपरम्परामपि सूचयति। एतेषां शिक्षणपद्धतिः पूर्णरुपेणार्षपरम्परामनुसरति इति विज्ञेयम्। दयानन्देन प्रतिपादितेषु शिक्षणपद्धतिषु–शब्दार्थः, व्युत्पत्तिः, अनुवादः, व्याख्यानम्, प्रवचनम्, प्रश्नोत्तरः, वार्तालापः, तर्कः,[2] व्याकरणदष्ट्या शब्दानां पारस्पारिकसम्बन्धश्चेति प्रमुखा आसन्। शिक्षणकाले शिक्षकः शुद्धोच्चारणेन छात्राणामुच्चारणं परिष्कारयेत्। उक्तं हि सत्यार्थप्रकशस्य ततीयसमुल्लासे प्रथमं पाणिनिमुनिविरचिता सूत्ररूपा शिक्षापद्धतिरध्येतव्या। अर्थात् अस्य वर्णस्येदं स्थानमिदं प्रयत्नं करणञ्चेदमिति। यथा 'प' अस्य औष्ठस्थानं स्पश्च प्रयत्नः औष्ठद्वयं संयोज्य समुच्चारणं, ह्रस्वदीर्घप्लुतान् तत्तद्वर्णान् याथार्थेन वदितुं पारयेत्, स्वरे च तस्य माधुर्यगाम्भीर्यसौन्दर्याणि सम्भवेयुः। अक्षर–मात्रा–वाक्य–संहितावसानानि पार्थक्येन श्रुतिपथमारोहेयुः।[3] एवं सर्ववर्णानां यथा योग्योच्चारणं मातपित्राचार्य्याः शिक्षयेयुः।

**व्याख्यापद्धतिः–** व्याख्याने आचार्याः शिक्षणीयतथ्यानामुपदेशं विस्ततरुपेण कुर्वन्ति स्म। ततः गुरुणामुपदेशानां श्रवणं विद्यया गुरुवचनानां बौद्धिकपरिग्रहणं मननेन शिष्याः कुर्वन्ति। व्याख्याने आचार्यः तथ्यस्य विशदां

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

व्याख्यां कुर्यात्। याः श३्काः तासामुल्लेखं विधाय तासां समाधानमपि कुर्यात् छात्रमुखात् कारयेत् च। अस्मिन् सन्दर्भ श्लोकोऽयं स्मरणीयोऽस्ति। तथाहि–

**पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना।**
**आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं स्मतम्।।**

महर्षिदयानन्दस्य व्याख्यानशेली कथमासीदिति सत्यार्थप्रकाशस्य पर्यालोचनेनैवज्ञायते। तद्यथा ″वद्धिरादैजिति'। ततः पदच्छेदान् 'वद्धिः, आत् ऐच् वा आदैजिति'। अनन्तरं समासान् 'आच्च ऐच्च आदेच्। ततः परमर्थान् अटैचां वश्द्धिसंज्ञा क्रियत इति (अर्थ समनन्तरं व्याख्यानम्) 'तपरो यस्मात् स तपरस्तादपि परस्तपर इति। एवञ्च अत्र अकारस्तकारपरत्वेनैच्च तकारतः परत्वेनोभावपि (आ ऐच्) तपरौ। दृ स्वप्लुतयोवद्धिसंज्ञाविषेधश्च तपरकरणप्रयोजनम्। उदाहरणं यथा–भाग इति। एवं सूत्रपाठपदच्छेद–समासार्थोदाहरण–व्याख्यादिकं क्रमेणाध्यापयेत्। पुनरप्युक्तम् – धातुपाठस्यानन्तरमुणादिकोशाध्यापने सकलसुबन्तविषयं सम्यगध्याप्य द्वितीयवारं शंकासमाधान वार्तिक कारिका–परिभाषाणां सोदाहरणं (समन्वयं) प्रवश्त्तिपूर्वकमष्टाध्याय्या द्वितीयावत्तिमध्यापयेत् इति। एवञ्च मनुस्मतिं वाल्मीकीयरामायणं महाभारतोद्योगपर्वान्तर्गतविदुरनीतिप्रमुखानि दुर्व्यसनापहारीणि सभ्यताजनकानि सत्प्रकरणानि काव्यमर्यादया पदच्छेद–पदार्थोक्ति–अन्वय–विशष्य–विशषणभावार्थपुरस्सरं गुरवः शिक्षयेयुरन्तेवासिनश्च शिक्षेयुरित्यवदन्।[4]

**भाष्यपद्धतिः–** व्याख्यापद्धत्याः विस्ततं रूपं भवति भाष्यपद्धतिः। महर्षिदयानन्दः भाष्यपद्धतेनुसरणं करोति। अतैवोक्तम्–पतञ्जलिमहर्षः व्याकरणमहाभाष्यं, व्यासमुनिकृतवेदान्तसूत्राणामुपरि वात्सायनमुनिकृतभाष्यं, वशेषिकशास्त्रे गौतममुनिकृतभाष्यम्, न्यायसूत्रेषु वात्स्यायनमुनिकृतभाष्यम्, पतञ्जलिमुनिकृतसूत्रेषु व्यासमुनिकृतभाष्यम्, कपिलमुनिकृतसांख्यसूत्रेषु भागुरिकृतभाष्यं वा बौद्धायनमुनिकृतभाष्यञ्च वत्तिसहितमध्येतव्यमध्यापयितव्यम्। कारणमत्र ऋषयः स्वसिद्धान्तप्रतिपादनाय अनेके लोकव्यवहाराः विषयाः दष्टान्ताश्च उदाहरन्ति। न्यायानां, युक्तीनाञ्च प्रतिपादनेन स्वविचाराः सिद्धान्तीक्रियन्ते।[5] दयानन्दस्य भाष्यसरणिः कथमासीदिति ज्ञातव्यं चेत् तेषामष्टाध्यायीभाष्यमवयं द्रष्टव्यम् ? तत्र नैके विषयाः प्रतिपादिताः वर्तन्ते।

**प्रश्नोत्तरपद्धतिः–** प्रश्नप्रतिप्रश्नपरिप्रश्नरूपेणच्छात्राः स्वजिज्ञासामुपसमयितुं प्रयासं कुर्वन्तिरितिहेतोः शास्त्राध्यापने प्रश्नोत्तरपद्धति श्रेष्ठा भवतीरित्युक्तं दयानन्देन। प्रश्नवैचिा। येण उत्तरवैचिा। येण चाध्यापनमध्ययनं च मनोरञ्जकं भवितुमर्हति। व्याकरणदर्शनादिसूत्राणां भाष्यादयः तात्कालिकी शिक्षणपरम्परामेव सूचयति। तत्र वर्तन्ते समुपस्थापिताः प्रश्नाः येषामुत्तरं भाष्यकारैः प्रदत्तं वर्तते। अनेन विषयस्पष्टीकरणे सन्देहलषोऽपि नावषिष्टो जायते। भगवान् दयानन्दः प्रश्नोत्तरप्रद्धत्याः समर्थकः भवति। उदाहरणेत्वेन सत्यार्थप्रकाशस्य कमपि विषयमुपस्थापयामः चेत् स्पष्टं विदितं भवति। तथाहि–

प्र.– सादिरनादिर्वा परमेश्वरः ?

उ– अनादिः। अर्थात् यस्य नास्त्यादिः किमपि कारणं समयो वा–स अनादिः।

प्र.– ननु परमेश्वरः किं वाञ्छति ?

उ.–सर्वेषां कल्याणं सर्वेभ्यः सुखञ्च वाच्छति। परं स्वातन। येणाकृतपापाचरं कमपि पराधीनं न कुरुते।

प्र.– परमात्मनः स्तुतिप्रार्थनोपासनाः समनुष्ठेया न वा ?

उ.– विधेयाः।

प्र. अपि परमेश्वरः स्तुत्याद्यनुष्ठानेन त्यक्त्वात्मनो व्यवस्थां स्तोतुः प्रार्थयितुर्वा क्षंस्यते दुरितानि ?

उ. नहि।

प्र.– किमर्थं तर्हि विधेये स्तुतिप्रार्थने ?
उ.– अन्यदेव तदनुष्ठानफलम्।
प्र. किं तत् ?
उ.– स्तुतिविधानेनात्मनि प्रीतिः, तदीयगुणकर्मस्वभावश्चात्मनो गुणकर्मस्वभावानां सशुद्धिः। प्रार्थनया निरभिमानत्वमुत्साहसाहय्ययाश्च सम्प्रातिः[6] इत्यादि। यजुर्वेदभार्येऽपि स्पष्टञ्चेदम्। तथाहि जिज्ञासवः सदा विदुषां सकाशाद्विद्याः प्राथ्र्य पच्छेयुर्यावद्युष्मासु पदार्थविज्ञानमस्ति तावत्सर्वमस्मासु धत्त। यावतीर्हस्तक्रिया भवन्तो जानन्ति तावतीरस्मान् शिक्षत यथा वयं भवदाश्रिता भवेम तथैव भवन्तोप्यस्माकमाश्रयाः सन्तु'[7] इति।
**आगमन–निगमनपद्धतिः–** आधुनिकविज्ञानशास्त्रेषु प्राकृतिकनियमानां, निश्चितानां सिद्धान्तानाञ्च बोधनाय इयं प्रणाली प्रयुज्यते। व्याकरणमपि भाषायाः स्वरूपस्य, स्वभावस्य च प्रतिपादकं शास्त्रं भवतीत्यतः अत्रापि शास्त्रीयपरिशोधनासरणिरावश्यकी। अस्यां प्रणाल्यां द्वे सोपाने वर्तते–आगमनं, निगमनञ्चेति। लक्ष्यं प्रदर्घ्य लक्षणपरिकल्पनं नाम आगमनम्। महर्षिणा पाणिनिनापि अनया पद्धत्या सकलवैदिकलौकिकपदजालं परिशील्य साधारणनियमाः, विशषनियमाश्च सूत्ररूपेण रचिताः। एवं प्रकल्पितस्य नियमस्य अन्येषु बहुषु उदाहरणेषु परीक्षणेन अतिव्याप्त्यव्याप्त्यादिदोषाणां परिहारेण निष्कर्षाणां निगमनमित्युच्यते। वार्तिकानां निर्माणे कत्यायनेन, व्याकरणमहाभाष्ये पतञ्जलिना च इयमेव पद्धति उपयुक्ता दश्यते। एवमेव अष्टाध्यायीभाष्ये, यजुर्वेद ऋग्वेदभाष्ये च महर्षिदयानन्देनाऽपि इयमेव पद्धति उपयुक्ता वर्तते। सत्यार्थप्रकाशस्य ततीयसमुल्लासे "अथ पठनपाठनविधिः' इत्युक्त्वा सोदाहरणं स्पष्टञ्चेतद् प्रतिपदितम्। वद्धिरादैजिति'। ततः पदच्छेदान् "वद्धिः आत् ऐच् वा आदैजिति'। अनन्तरं समासान् 'आच्च ऐच्च आदैच्। ततः परमर्थान् आदेचां वद्धिसंज्ञा क्रियत इति (अर्थसमनन्तरं व्याख्यानम्) "तपरौ यस्मात् स तपरस्तादपि परस्तपर "इति। एवञ्चात्राकारस्तकारपरत्वेनैच्च तकारतः परत्वेनोभावपि (आ ऐच्) तपरौ। दृ स्वप्लुतयोवद्धिसंज्ञानिषेधश्च तपरकरणप्रयोजनम्। अनन्तर मुदाहरणम्। भाग इति। (पाषाणपट्टिकायां काण्ठपट्टे वा शब्दानां प्रक्रियारूपं विलिख्य सन्दर्शयन् अध्यापयेत् अध्यापकः इति ऋषिणामाशयः) यथा हि 'भज् घञ् सुँ इत्थं विलिख्य प्रथमं घकारस्यानन्तरं 'कारस्य लोपे 'भज् + अ + सु' इति स्थितम्। ततोऽकारस्याकारवद्धौ जकारस्य गकारे च 'भाग् अ सुँ (इति स्थितम्) –पुनरकारसम्मेलनेन भाग + सुँ इत्यवशिष्टम्। उकारस्येत्संज्ञायां सस्य रुत्वे पुनरुकारस्येत्संज्ञालोपयोः 'भाग ँ' इति जाते, इदानीं रेफस्य विजर्जनीये 'भागः' इति सिद्धम्[8]।"

एवं येन येन सूत्रेन यद्यत्कार्यं भवति वत्तदध्यापयन् विलेखयंश्च शिक्षयेत् इत्थमध्ययनाध्यापनेन झटित्येव सम्यग्बोधः सञ्जायते।

अत्रैदमवधेयं यत् ज्ञातात् अज्ञातं प्रति, सरलात् कठिनं प्रति, सामान्यात् विशष प्रति इत्यादिशिक्षणनियमानां सन्निवेशोऽपि आसीत्। अतैवोक्तम् 'प्रथममष्टाध्यायीमध्याप्य तदनु सार्थक सदशलकाररूपं प्रक्रियासहितमुत्सर्गापवादपुरस्सरं धातुपाठम् अध्यापयेत्। अनन्तरञ्च महाभाष्यं पाठ्येत् इति।
**प्रयोगपद्धतिः–** अर्थवेदः अथवा शिल्पशास्त्रं यथा विश्वकर्मणः त्वष्टुः मयस्य च सहिताग्रन्थाः सन्ति एतान्। "पटसु वर्षपु अधीत्य तारभूगर्भविद्याः साक्षात् कुर्यात् अर्थात् प्रयोगं विधाय साक्षात्कारः कार्यः। श्रवणं मननं निदिध्यासनं साक्षात्कारः इति साधनचतुष्टयम्, इत्यस्य उल्लेख नवमसमुल्लासे मुक्तिसाधनेषु कृतम्। अपि च सत्यासत्यनिर्णयाय महर्षिदयानन्दः उवाच–पठन पाठनं सम्यक् परीक्ष्य कर्तव्यं परीक्षा पञ्चधा भवति। तद्यथा प्रथमा यद् यद् ईश्वरस्य गुणकर्मस्वभावनुकूलम् अपि च वेदानुकूलं भवति तत्सत्यमन्यत् मिथ्या। द्वितीया यद् यत्, सष्टिनियमानुसारं विज्ञानानुकूलं भवति तत् सत्यम् अन्यत् असत्यम्। ततीया

आप्तकथनं यथा धार्मिकः सत्यवादि निश्च्छलः परोपकारी आत्मनः पवित्रता, विद्यायाः अनुकूलं तद्यथा अष्टौ प्रमाणानि तानि च प्रत्यक्षम्, अनुमानम्, विपश्चित् यद् यद् उपदिशति तत् सत्यं अन्यत् मिथ्या। चतुर्थएँ आत्मनि रहसि सत्यासत्यप्रत्ययो भवति तथा निर्णेतव्यम्। पञ्चमी उपमानम्, आप्तोपदशः (शब्दः) ऐतिह्यम् अर्थापत्तिः संभवः, अभावर्पत।

**श्रवणमनननिदिध्यासनसाक्षात्कारपद्धतिः –** अध्ययनाध्यापनक्रमेषु 'श्रवनम्' इति प्रथमम्, 'मननम्' इति द्वितीयं तदनन्तरं नदिध्यासनं ततः 'साक्षात्कारः' इति निरूपितं व्यावहरभानुनामके ग्रन्थे। यो वै वेदान् केवलं स्वरपाठमात्रेणाधीत्य तदर्थं न विजानाति श्रवणमनननिदिध्यासनादि यो नाचरति स खलु प्रशाखा–पर्ण–पुष्प–फलभरं–शाखीव धन्यादिभरमन्यपशुरिव वा भारमेव वहति। यः पुनर्वेदानधीत्य, यथावत्तदर्थमधिगच्छति स एव निखिलमानन्दमुपलभ्य मरणानन्तरमपि ज्ञानेन विधूय पापानि धर्माचरप्रभावेण सर्वानन्दमनुते। एतदर्थं पठितपाठस्य मुहुर्मुहुः चिन्तनस्य मननस्य वा महती आवश्यकता वर्तते। शिष्याः बौद्धिक दष्टया परिगहीतविषयाणां साधनात्मकानुभूतौ निदिध्यासनमपि कुर्युः। ततः श्रवणमनननिदिध्यासनेन विषयाणां पारस्पारिकसम्बन्धन भवति, येन छात्रस्य पूर्ण–बोधः अथवा साक्षात्कारः भवतीतिः।[9] एतादशं ज्ञानं कल्याणप्रदं सार्वभौमिकञ्च भवति।

**शास्त्रार्थपद्धतिः–** स्ववैदुष्यं प्रमाणयितुं, स्वभावाभिव्यक्तिकाशलमभिव्यञ्जयितुमयं सर्वतोभावेनात्यन्तं लोकप्रियो पद्धतिरभवत्। शास्त्रार्थे द्वौ पक्षौ भवतः। एकः पूर्वपक्षः अपरश्च उत्तरपक्षः। पूर्वपक्षे प्रश्नानां समुपस्थापनं, उत्तरपक्षे उपस्थापितानां प्रश्नानां तर्कसंगतमुत्तरञ्च प्रस्तूयते। एवं प्रकारेणायं क्रमः प्रचलति। निर्णायकस्य निर्णयानुसारं सिद्धान्तपक्षः स्वीकृतो भवति।

वादी प्रतिवादीभ्यां निणएँतोऽर्थः सिद्धान्तः' इति प्रथितमेवास्ति। तस्मात् अस्मिन् विधौ एकः पक्षः, द्वितीयं पक्षं पराजित्य स्वसिद्धान्तपक्षञ्च विदुषां समक्ष प्रदर्घ्य विदुषां सभायां ते गौरवान्विताः भवन्ति। अनया पद्धत्या छात्राणां ज्ञान–प्रत्यास्मरण–तर्क–प्रतिभाप्रभतीनां शक्तीनां मूल्या[3]कनं जायते। स्वामीदयानन्दसरस्वतीमहोदयः आर्यसमाजस्य वैशिष्ट्यं प्रतिपादयन्, अन्यं पक्षञ्च सन्दूषयन् अस्यैव विधेः प्रयोगमकाषएँत्, स्पष्टञ्चेदम् काशीशास्त्रार्थग्रन्थे हुगलीशास्त्रार्थग्रन्थे च।

**तर्कपद्धतिः–** विलक्षणप्रतिभाप्रदर्शनाय एषा पद्धतिराश्रियते। राजानः पुराकाले स्वसभायां देशस्य विविधेभ्यो भागेभ्यो विदुषः समाहूय अनया पद्धत्या शास्त्रार्थं कारयन्ति स्म। महर्षिदयानन्देनाऽपि इयमेव पद्धति उपयुक्ता वर्तते काशीशास्त्रार्थसभायाम्। तर्कशेल्या कस्यचित् मतस्योपस्थापन सम्भवम्। अतैव शास्त्राणामध्ययनमध्यापनमनया पद्धत्या भवेदिति स्वामिचरणानामादेशः आसीत्। तथाहि हे गहास्थाः! नहि तर्केण विना काचिद्विद्या कस्यचिद्भवति नहि विद्यया विना कश्चित्पदार्थेभ्य उपभोगं ग्रहीतुं शक्नोति[10] इति। वेदनिष्ठ आर्यविषयाणां प्रतिपादनमनार्यविषयाणाञ्च निषेधः अनया पद्धत्या क्रियते। अत्रावधेयं यत् महर्षिदयानन्दः यदा गुरुवरविरजानन्दात् व्याकरणमध्यगीष्ट तदा गुरुः तस्मै उपदिदेश यत् ऋषिप्रणीतानि आप्तोपदिष्टानि शास्त्राणि पुस्तकानि पठितव्यानि, लौकिकपुरुषेः निर्मितानि क्षुद्राशयानि अनार्षपुस्तकानि न पठितव्यानि इति। अतः स्वामिदयानन्दोऽपि स्वकीयरचनासु सर्वत्र आर्षग्रन्थानां पठनस्य माहात्म्यं वर्णयामास, तद्यथा सत्यार्थप्रकाशं ततीये समुल्लासे "अनार्षलौकिकग्रन्थानां पठनं तावत् महता परिश्रमेण अल्पलाभप्राप्तिः यथा महतो वशस्तम्भात् लट्वानुकर्षणम्। परन्तु आर्षग्रन्थानां पठनं तथा वर्तते यथा "एकदा निमज्जनं वहुमूल्यमुक्तासम्पादनम्।" अतः सत्यार्थप्रकाशे ऋग्वेदादिभाष्यभूमिकायां संस्कारविधौ च स्पष्टतया आर्षग्रन्थानामुल्लेखः तेषां पठनक्रमच प्रदत्तः।"[11]

**सम्भाषणपद्धतिः–** कमपि व्यवहारं विषयं वा आदाय अध्यापकः छात्रैः साकं सम्भाषेत। छात्रानपि मिथः सम्भाषितुं प्रेरयेत् अध्यापकः। यजुर्वेदभाष्ये आदर्शरूपेणोक्तम् हे स्त्रियः! यूयमोषधिविद्यायै परस्परं

संवदध्वमिति।[12] अनेन छात्राणां दैनन्दिनव्यवहारेषु सम्भाषणं कथं स्यादिति ज्ञानं निर्धारितविषयस्य विषये च ज्ञानं स्पष्टं भवति। महर्षिदयानन्दप्रणीत
संस्कृतवाक्यप्रबोधः पूर्णरूपेण सम्भाषणपद्धत्या वर्तते। उदाहरणार्थमत्रलेख्यलेखकप्रकरणमुपस्थाप्यते। तथाहि – सुवर्णाक्षराणि लिखितुं जानासिन वा ?
जानामि तु, परन्तु सामग्रीमंचयने लेखने च विलम्बो भवति।
यद्यङ्गुष्ठतर्जनीभ्यां लेखनी गश्हीत्वा मध्यमोपरि संस्थाप्य लिखेत् तर्हि प्रशस्तो लेखो जायेत।
यदि त्वमेकाहं सततं लिखेस्तर्हि कियत श्लोकालैलिखितुं शक्नुयाः?
पञ्चशतानि।
यदि शिक्षा गहीत्वा शनैः शनैर्लिखितुमभ्यस्येत् तर्हि अक्षराणां सुन्दरं स्वरूपं स्पष्टता च जायेत[13] इत्यादि।
एवमेव आत्मीयप्रकरणेऽपि
भवतः कन्या अद्यश्वः किं पठन्ति ?
वर्णोच्चारणशिक्षादिकं दर्शनशास्त्राणि चाधीत्येदानी धर्म–पाक–शिल्प–गणितविद्या अधीयते।
भवज्ज्येष्ठया भगिन्या किं किमधीतम्, इदानीञ्च तया किं क्रियते ?
वर्णज्ञानमारभ्य वेदपर्यन्ताः सर्वा विद्या विदित्वेदानी बालिकाः पाठयति[14] इत्यादि।

**क्रियात्मकपद्धतिः–** मनोवैज्ञानिक पद्धतिरेषा। अनया व्यावहारिककुशलतायाः परीक्षणं क्रियते। यजुर्वेदभाष्ये उक्तं हि– यथाऽश्वशिक्षकाः प्रत्यत्वश्वान् सुशिक्षयन्ति तथा गुरवो विद्यार्थीनां चेष्टाकरणानि शिक्षयन्ति।[15] एवञ्च विद्वद्भिरस्मिन् जगति द्वे कर्मणी सततं कार्ये। आद्यं ब्रह्मचर्यजितेन्द्रियत्वादिशिक्षया शरीरारोग्यबलादियुक्तं चिरंजीवनमुत्तरं विद्याक्रियाकौशलग्रहणेनात्मवलं च संसाध्यम् यतः सर्वे मनुष्या शरीरात्मबलयुक्ताः सन्तः सर्वदानन्देयुरिति।[16] सत्यार्थप्रकाशेऽपि उक्तं वर्तते यत्–अथर्ववेदं–यं हि शिल्पविद्येति समाचक्षते–अधीयीरन्। तत्र पदार्थानां गुणविज्ञानं क्रियासु कौशलं नानाविधद्रव्याणां निर्माणपाटवं पथिवीतो द्युपर्यन्तस्य विज्ञानम्, बीजांकगणितं, भूगोलखगोलविज्ञानं, वैद्यकशास्त्रं सर्वविधां हस्तक्रियां यन्त्रकलाविद्यञ्च अनया पद्धत्या अध्येतव्यमध्यापयितव्यञ्चेति।"[17]

परन्त्विदन्तु सत्यमेव यत् अनया पद्धत्या पूर्वं शास्त्राणां संरक्षणं यथाऽभूत् न तथाऽद्यत्वे दरीदश्यते। यद्यप्यद्यत्वेऽपि न सर्वथेयं भारतीयाभूमिः शून्या, परन्तु साम्प्रतं विरला एव विद्वांसः सन्ति येषां पद्धतीनां विषये रुचिः निष्ठा श्रद्धा वा स्यात्। इदन्तु धवं यत् आर्षशिक्षणपद्धतेः आर्षसंस्कृत्याः च संरक्षणार्थं पुनराद्रेया इमाः पद्धतयः।

**सन्दर्भ :**

1. ऋग्वेदादिभाश्यभूमिका, प. सं. 241
2. सत्यार्थप्रकाशः, ततीयसमुल्लासः, प. सं. 59
3.सत्यार्थप्रकाशः, द्वितीयसमुल्लासः, प. सं. 24
4.सत्यार्थप्रकाशः, ततीयसमुल्लासः, प. सं. 62
5.सत्यार्थप्रकाशः, ततीयसमुल्लासः, प. सं.64
6.सत्यार्थप्रकाशः, ततीयसमुल्लासः, प. सं. 181
7. यजुर्वेदभाष्यम्, 12.47, भावार्थः
8. सत्यार्थप्रकाशः, ततीयसमुल्लासः, प. स. 60

9. व्यवहारभानुः, प. सं. 7
10. यजुर्वेदभायम्, 8.56, भावार्थः
11. दयानन्दगैर्वाणी, प. सं. 13
12 यजुर्वेदभाष्यम् 12.88 भावार्थ
13. संस्कृतवाक्यप्रबोधः प.सं.64
14. संस्कृतवाक्यप्रबोधः प.सं.52
15. यजुर्वेदभाष्यम् 25.42 भावार्थ
16.यजुर्वेदभाष्यम् 11.35 भावार्थ
17. सत्यार्थप्रकाशः प.सं.66